॥ नमश्शिवायै च नमश्शिवाय ॥

संस्कृतवाङ्गमयालोके विविधसंस्काराणां प्रासङ्गिकतासन्दर्भे समुपादेयतायाः विशिष्टमध्ययनम्

A special study of its utility in the context of the relevance of various Sanskāras in the Sanskrit Literature

राँचीविश्वविद्यालयस्य मानविकीसङ्कायान्तर्गत डी.लिट्.(विद्यावाचस्पति) उपाधये प्रस्तुतः

शोधप्रस्तावः - The Proposal

Proposed for the award of D.Litt. Degree at
Ranchi University, Ranchi, Jharkhand-834001

मार्गदर्शिका

प्रॉ. अर्चनाकुमारी दुबे
मानविकीसङ्कायाध्यक्षा
राँचीविश्वविद्यालयः
झारखण्डः

गवेषकः

डॉ. पङ्कजकुमार एस. रावलः
प्राध्यापकः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
सञ्चालित संस्कृत कॉलेज,
वेरावलम्, गुजरातम्

क्रमः	विषयानुक्रमणिका	पृष्ठम्
१	संस्कृतवाङ्मयस्येषत्परिचयः	१
२	श्रुतिवाङ्मयम्	
३	स्मृतिवाङ्मयम्	
४	पुराणवाङ्मयम्	
५	उपवेदवाङ्मयम्	
६	वेदान्तवाङ्मयम्	
७	वेदाङ्गवाङ्मयम्	
८	आध्यात्मिकप्रमाणानि	
९	ऐतिहासिकप्रमाणानि	
१०	मनोवैज्ञानिकप्रमाणानि	
११	शास्त्रोक्तविधिः	
१२	संक्षिप्तविधिः	
१३	फलश्रुतिः	
१४	दृष्टान्तजगत्	
१५	सन्दर्भग्रन्थसूचिः	

***

उपचारविभाजनम्

प्रथमोपचारः- संस्कृतवाङ्मयस्य परिचयः संस्काराश्च।

१.१ वैदिकवाङ्मयम्।

१.१.१ ऋग्वेदः।

१.१.२ यजुर्वेदः।

१.१.३ सामवेदः।

१.१.४ अथर्ववेदः।

१.२ ब्राह्मणवाङ्मयम्।

१.२.१ शतपथब्राह्मणम्।

१.३ आरण्यकवाङ्मयम्।

१.४ उपनिषद्वाङ्मयम्।

द्वितीयोपचारः- स्मृतिवाङ्मयस्य परिचयः संस्काराश्च।

२.१ मनुस्मृतिः।

२.२ याज्ञवक्यस्मृतिः।

२.३ अत्रिस्मृतिः।

२.४ विष्णुस्मृतिः।

२.५ हारीतस्मृतिः।

२.६ औशनसस्मृतिः।

२.७ आपस्तम्बस्मृतिः।

२.८ आङ्गिरसस्मृतिः।

२.९ नारदस्मृतिः।

२.१० शङ्खस्मृतिः।

२.११ लिखितस्मृतिः।

२.१२ शातातपस्मृतिः।

२.१३ वशिष्ठस्मृतिः।

२.१४ कात्यायनस्मृतिः।

२.१५ गौतमस्मृतिः।

२.१६ दक्षस्मृतिः।

२.१७ यमस्मृतिः।

२.१८ संवर्त्तस्मृतिः।

२.१९ बृहस्पतिस्मृतिः।

२.२० व्यासस्मृतिः।

२.२१ पाराशरस्मृतिः।

तृतीयोपचारः-पुराणवाङ्मयस्य परिचयः संस्काराश्च।

३.१ मत्स्यपुराणम्।
३.२ मार्कण्डेयपुराणम्।
३.३ भागवतपुराणम्।
३.४ भविष्यपुराणम्।
३.५ ब्रह्मपुराणम्।
३.६ ब्रह्माण्डपुराणम्।
३.७ ब्रह्मवैवर्तपुराणम्।
३.८ विष्णुपुराणम्।
३.९ वराणपुराणम्।
३.१० वामनपुराणम्।
३.११ वायुपुराणम्।
३.१२ अग्निपुराणम्।
३.१३ नारदपुराणम्।
३.१४ पद्मपुराणम्।
३.१५ लिङ्गपुराणम्।
३.१६ गरुडपुराणम्।
३.१७ कूर्मपुराणम्।
३.१८ स्कन्दपुराणम्।

चतुर्थोपचारः- उपवेदानां परिचयः संस्काराश्च।

४.१ आयुर्वेदः।
४.२ धनुर्वेदः।
४.३ गान्धर्ववेदः।
४.४ अर्थवेदः(शिल्पस्थापत्यकलावेदः)।

पञ्चमोपचारः-वेदान्तवाङ्मयस्य परिचयः संस्काराश्च।

५.१ न्यायः।
५.२ वैशेषिकम्।
५.३ साङ्ख्यम्।
५.४ योगः।
५.५ मीमांसा।
५.६ वेदान्तः।

षष्ठोपचारः- वेदाङ्गवाङ्मयस्य परिचयः संस्काराश्च।

६.१ छन्दः।
६.२ कल्पः।
६.३ ज्यौतिषम्।
६.४ निरुक्तम्।
६.५ शिक्षा।
६.६ व्याकरणम्।

सप्तमोपचारः- आध्यात्मिकप्रमाणानि।

अष्टमोपचारः- ऐतिहासिकप्रमाणानि।

नवमोपचारः- मनोवैज्ञानिकप्रमाणानि।

दशमोपचारः- संस्काराणां शास्त्रोक्तविधिः प्रयोजनानि च।

एकादशोपचारः- संक्षिप्तविधिः अवधिश्च।

द्वादशोपचारः-संस्कृतवाङ्गमये संस्काराणामुदाहरणानि।

त्रयोदशोपचारः- संस्काराणां फलश्रुतिः।

चतुर्दशोपचारः- संस्कारेषु विविधमतानि सङ्ख्या च।

पञ्चदशोपचारः- संस्काराणां वर्तमानसन्दर्भे प्रासङ्गिकता।

षोडशोपचारः- राष्ट्रियशिक्षानीतिः(२०२०) तदधारेण संस्काराणां समुपादेयता।

सन्दर्भग्रन्थसूचिः जालस्थानञ्च ।

- **उपक्रमः।**

भारतीयसंस्कृतिसंस्कारयोः मूलं यदि कुत्रचिदस्ति चेत् संस्कृतवाङ्गमये तन्निहितं वर्तते। विश्वस्मिन् भारतीयायाः संस्कृत्याः संस्काराणां च प्रशस्तिः अस्ति तस्य मूलं कारणं संस्कृतवाङ्गमयं विद्यते। संस्कृतं नाम वेदोपवेदाः पुराणोपुराणानि रामायणं महाभारतं वेदान्तं वेदाङ्गं च। एतैः सद्ग्रन्थैः शाखोपशाखैः संस्कृतवृक्षं वटवृक्षमिव व्यापृतं प्रतीयते। संस्कृते का संस्कृतिः तदभिव्यक्तं भवति संस्कारैः। भारतीयसनातनसंस्कृतेः पञ्चप्राणाः सन्ति। वेदादिशास्त्राणि तीर्थधामानि साधवः सन्तः मन्दीराणि गावः वृक्षाश्च एतैः विभूषितेयं संस्कृतिः तावच्चीरन्तना न भवति यावत् संस्काराः न विलसन्ति। संस्कारशब्दस्य विविधाः अर्थाः भवन्ति तत्र विशेषतः विनयविवेकाचारपूर्णः व्यवहारः संस्कारः इति लौकिकजगति प्रसिद्धोऽयमर्थः किन्तु आध्यात्मिकदृष्ट्या धर्मशास्त्रीयदृष्ट्या ग्रन्थाधारेण यः विशिष्टोऽर्थः स्तुत्यः अस्ति सः गर्भाधानादारभ्य अन्त्येष्टीसंस्कारं यावत् विविधैः विधानैः विधिभिश्च विलसत्ययं संस्कारशब्दः।

सम् उपसर्गपूर्वकं कृ धातुना सम्यक् कृतं सम्यक् कृतिः सम्यक् करणम् इति सन्दर्भे संस्कारशब्दः संस्कृतसंस्कृतिभ्यां परिपुष्टो भवति। मातुः गर्भादेव संस्काराणाम् आरोपणं भवति चेन्मरणान्तं यावत् सः जीवः प्रायः न बोधनीयः न पाठनीयः भवति। अत एव प्रोक्तं यत्-

जन्मना जायते जन्तुः संस्काराद्द्विज उच्यते।

सर्वेऽपि जीवाः संस्कारेण सुसंस्कृताः द्विजत्वधर्मैः संपोषकाश्च भवन्ति। संस्कृतवाङ्मयं कीदृशं समृद्धं विशालम् उपासनाज्ञानकर्मकाण्डैश्च प्रेरणाप्रदमस्ति। तद् ऋषीणां मुनीनां त्रिकालदर्शीत्वम् ऋषित्वं सिद्ध्यति। महापुरुषाणां चिन्तनात्मिका दृष्टिः धार्मिकदृष्ट्या आध्यात्मिकदृष्ट्या पारमार्थिकदृष्ट्या तात्त्विकदृष्ट्या किं प्रेरयति तत् तावत् कालपर्यन्तं ज्ञातुं न शक्यते यावत् कालपर्यन्तं शास्त्राणि न जीव्यन्ते। मानवजीवनव्यवहारे शास्त्राणि मनोवैज्ञानिकानि स्वास्थ्यलाभकराणि संवादपूर्णानि सर्वविधलाभकराणि च सन्ति तद् संस्कारैः ज्ञातुं शक्यते।

- **संस्काराः**

संस्कृतवाङ्गमये संस्कारभास्करादारभ्य संस्कारप्रकाशं यावत् संस्कारान् प्रकाशयितुं यावन्तः ग्रन्थाः विलसन्ति तेषु सर्वेषु ग्रन्थेषु संस्काराणां सङ्ख्या भिन्ना भिन्ना दर्शिता सन्ति किन्तु सर्वेषां संस्काराणां पृष्ठे कः पारमार्थिकः लाभः तदाद्योपान्ततया केनापि ज्ञातुं न शक्यते। यथा यथा मानवशरीरे समये समये संस्काराः भवन्ति तथा तथा कालक्रमेण ईषज्ज्ञातुं शक्यते। संस्काराणां पृष्ठेऽपि एकः धार्मिकभावः नितान्तं मानवकल्याणं कर्तुं ऋषिभिः प्रेरितः वर्तते। के प्रसिद्धाः संस्काराः? तर्हि –

गर्भाधानं पुंसवनं सीमन्तो जातकर्म च।

नामक्रिया निष्क्रमणोन्नाशनं वपनक्रिया॥

कर्णवेधो व्रतादेशो वेदारम्भः क्रियाविधिः।

केशान्तस्नानमुद्वाहो विवाहाग्निपरिग्रहः॥

त्रेताग्निः संग्रहश्चेति संस्काराः षोदशः स्मृताः।

नवेताः कर्णवेधान्ताः मन्त्रवर्ज्यं क्रिया स्त्रियः॥

- व्यासस्म्रुतिः।

संस्काराणां पृष्ठभूमिः धर्मे परिणिता भवति। तद्धर्मरहस्यमद्यावधिः पूर्णतया न केनापि ज्ञातम्। यथा-

श्रुतिर्विभिन्ना स्मृतयोऽपि भिन्ना नैकोमुनिर्यस्य वतः प्रमाणम्।

धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः॥

विधिपूर्वकं संस्काराणां परिपालनं सश्रद्धं क्रियते चेत् सम्पूर्णं धर्मशास्त्रीय फलं लभ्यते एव इति ऋषीणां विश्वासः। संस्काराणां सङ्ख्याविषये मतभेदाः सन्ति किन्तु तत्फलश्रुतौ सर्वेषां मुनीनां मनसः ऐक्यं सर्वत्र सर्वदा विलसति।

अत्र संशोधनेन संस्कृतवाङ्गमयस्य संस्कारप्रतिपादकानां सद्ग्रन्थानां तात्त्विकदृष्ट्या परिशीलनं कृत्वा मानवसमाजे किमेतेषां संस्काराणां प्रयोजनं

तत्प्रमाणपुरस्सरं प्रतिपाद्य ऋषीणां मुनीनां पुरुषार्थं सफलं कर्तुं नम्रः प्रयासः विधीयते।

- **गवेषणस्योद्देश्यं प्रेरणास्रोतश्च।**

नूतनराष्ट्रियशिक्षानीत्यां भारतीयज्ञानपरम्परायाः एकः विशिष्टः आदरः प्रतिपादितः वर्तते। केन कारणेन सः आदरः प्रदर्शितः केन कारणेन भारतस्य भारतत्वं सिद्ध्यति। तज्ज्ञानाधारेणैव सिद्धं कर्तुं विषयोऽयं चितः वर्तते। भा दिप्तौ ज्ञानपूर्णप्रतिभायां रतः इति कृत्वा भारतः। तत्तादृशं ज्ञानं किम्? तर्हि संस्कारा अपि तज्ज्ञानं प्रतिपादकाः भारतस्य भारतत्वं सिद्धं कुर्वाणाश्च सन्ति।

विश्वयोगदिवसेन यथा भारतीयैः योगमहत्त्वं ज्ञातं तत्पूर्वमपि भारतदेशसमुत्पन्नेन पतञ्जलिना योगशास्त्रं तु दत्तमेवासीत् किन्तु वैश्विकिप्रतिष्ठा योगदिवसेन मुनिना पतञ्जलिना सम्प्राप्ता। एतादृशमेव संस्कारविषये अस्माकं न भवेत् तत्पूर्वमनेन संशोधनेन भारतीयसमाजः जागृको भवेदित्येकः शुभसङ्कल्पोऽस्ति। आदर्शसमाजनिर्माणाय विश्वबधुत्वभावनां निर्मातुं, विश्वं भत्येकनीडम्, वसुधैव कुटुम्बकम् इत्यादीनि वाक्यानि सफलीकर्तुं विविधाः योजनाः स्पर्धाः परिपत्राणि सर्वं भवति किन्तु ऋषिषु अहं दृढं विश्वसिमि यत् संस्काराणां संस्कृतिः यावत् कार्यान्विता न भविष्यति तावदाभ्यान्तर जगतः उत्कृष्टः सद्भावः न समुदेष्यति। ऋषीणां चिन्तनं कीदृशमासीत् कया रित्या जीवनं यापयित्वा कन्दमूलानि भुक्त्वा तपः कृत्वा संसाराय समाजाय जगते सद्ग्रन्थाः प्रदत्ताः सन्ति तदनेन संशोधनेन परिचयितुमीहे।

इदं संशोधनं समाजतोषणाय भवेद्वा न भवेत् किन्तु ऋषितर्पणाय शोधस्यास्य समर्पणं भविता अर्थाद् अनेन संशोधनेन ऋषिभ्यः मुनिभ्यः अर्घ्यप्रदानात्मकं कर्म भविष्यति कश्चिदेकः परिवारः संस्काराणां सुविस्तृतं परिचयं चिन्तनं ज्ञात्वा पठित्वा कार्यान्वितो भविष्यति चेदपि तस्य परिवारस्य पूर्वजाः मम परिवारस्य पूर्वजाश्च परितृप्ताः भविष्यन्ति इति उदात्तभावनया भगवत्कृपया गुरोरनुग्रहेण विषयोऽयं

चितोऽस्ति। भारतीयग्रन्थान् प्रति जनानामादरः समादरः भवेत् तदप्येकं प्रयोजनमस्ति।

“विद्याकामस्तु गिरीशम्” इति भगवतः वेदव्यासस्य वचनमनुश्रुत्य भगवतः श्रीसोमनाथस्य परमानुकम्पया प्रेरणया शोधप्रबन्धोऽयं मानवसमाजोपकारको भवेदिति धिया विषयस्यालोडनं संस्कृतवाङ्गमयदृष्ट्या भविष्यति।

- **परिकल्पना**

संस्कृतवाङ्गमये विद्याविद्ये इति द्वौ भागौ स्तः। “अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते”। संस्कृतवाङ्गमये निर्दिष्टानां सिद्धान्तानां क्रियान्वयनं कर्तुं प्रयोगशालारूपेण समाजः एव वर्तते। तत्रापि विधिपूर्वकं संस्काराणां क्रियान्वयनं न जडपदार्थेषु अपि तु चेतनतत्त्वेषु प्रयोगविधिः भवति फलश्रुतिरूपेण जडात्मिकासृष्टिरपि लाभान्विता भवति। आगमनिगमनाभ्यां पद्धतिभ्यामभ्यासैः स्वाध्यायेन पूर्वसंशोधनानाम् आधारेण महापुरुषाणां कथाप्रवचनैः भारतीयसमाजे कर्मकाण्डविधिना संस्कारेषु वैश्विकचिन्तनेन परिशिलनेन समालोचनेन तुलनात्मकेन विशिष्टाध्ययनेन च विषयस्यास्य चितन्तपूर्वकोऽभ्यासो भविष्यति। संस्कृतभाषायां संशोधनं कर्तुं याः पद्धत्यः परिकल्पनाः प्रदत्तास्सन्ति तत्र विशेषतः “महाजनो येन गतः स पन्थाः” इति न्यायेन भवति द्वितीयं पुराणस्यैका पद्धति अस्ति अन्वयात्मिका व्यतिरेकात्मिका च आभ्यां द्वाभ्यां परिशीलनं कृत्वा समीक्षणं कृत्वा कार्यमिदं भविष्यति। महाकविः कालिदासः यथा कथयति- “पुराणमित्येव न साधु सर्वम्” किन्तु संस्कारविषये यथा पूर्वजानाम् ऋषिमुनीनां दार्शनिकं चिन्तनमस्ति तज्ज्ञात्वा फलरूपेण शास्त्रेषु उत्तमां सन्ततिं दृष्ट्वा पुराणमित्येव हि साधु सर्वम् इति स्पष्टं सिद्धं च भविष्यति। विषयोऽयं त्रिषु कालेषु अनुसन्धेयोऽस्ति इति न अपि तु चतुर्युगेषु विषयोऽयं बहुप्रचलितोऽस्ति। एवं च भारतस्य विश्वगुरुत्वं यदासीत् तस्मिन्नवसरेऽपि विषयास्य योगदानं नितरां विलसति स्म। संस्कृतवाङ्गमयस्य ज्ञानविज्ञानमयः योगः अर्थात् प्राप्तस्य ज्ञानस्यानुभूतिः न तु केवल Science. महाभारते तु भगवान् वेदव्यासः कथयति यत्- “पादपाः जिघ्रन्ति श्रुणवन्ति पश्यन्ति स्पर्शन्ति च।” संस्कारेण सुसंस्कृतः

मानवः एव इमां संवेदनां ज्ञातुं शक्नोति। अनुभूतेः अयं विषयः भारतीयसंशोधनपद्धत्यां साधनया उपासनया ज्ञानेन कृपयानुग्रहेण च वेत्तुं शक्यते।

विद्यया तपसा देवानुग्रहेण संवेदनशीलेषु विषयेषु किमपि अध्येतुं शक्यते। पूर्वजानाम् ऋषीणां चिन्तनं वर्तमानयुगानुसारं वैज्ञानिकमेवासीदिति आधुनिकाः वैज्ञानिकाः निगदन्ति। नाम ऋषीणां वैज्ञानिकत्वं सिद्ध्यति किन्तु आधुनिकवैज्ञानिकानां ऋषित्वं न सिद्ध्यति कारणं तपसोऽभावः।

- **संशोधनक्षेत्रं संशोधनसाधनानि च ।**

संस्कृतवाङ्मये स्थितानां विषयानां संशोधनानां च क्षेत्रं प्रयोगशाला च समाज एव भवति। शास्त्राणां सर्जनं शास्त्राणां समुपादेयता मानवजीवनाय मानवकल्याणाय चरमपुरुषार्थरूपेण मोक्षसिद्ध्यै च वर्तते। संशोधनस्यास्य मुख्यविषयत्वेन संस्कारशब्दोऽस्ति। गर्भाधानादिसंस्काराणां परिपालनेन इहमुष्मिकलाभो वर्तते। शास्त्राणि न केवलं प्रेयसे अपि तु सर्वथा प्रेयसा सह श्रेयसे। कठोपनिषदि यथोक्तम्- “श्रेयश्च प्रेयश्च मनुष्यमेतत्”। शास्त्रेषु निर्दिष्टं संशोधनं चतुराशीतिलक्षपरिमितयोनीनां भद्राय श्रेयसे वर्तते अतः संशोधनक्षेत्रं चतुस्समुद्रपरिखा वसुधास्ति।

वेदादारभ्य वर्तमानकाले सृज्यमानं संस्कृतवाङ्गमयं संशोधनस्य साधनभूतं वर्तते। “वेदोऽखिलो धर्ममूलम्” इति स्मृत्युक्तवचनं विषयसन्दर्भेऽपि प्रस्तुतं वर्तते। “सर्वज्ञानमयो हि सः” एषः वेदः ज्ञानविज्ञानानां सर्वकालीनं साधनं साधकेन यत् साध्यमस्ति तदर्थं विलसति। अतः भाष्यग्रन्थाः टीकाग्रन्थाः आनुदीतग्रन्थाः सर्वथा संशोधनेऽस्मिन् साधनभूताः सन्त्येव।

- **संशोधनस्यावश्यकता ।**

वेदानामाज्ञास्ति सत्यं वद, धर्मं चर, मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथि देवो भवः, स्वाध्यायान् मा प्रमदः, स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्, श्रद्धया देयम् इत्यादीनि वचनानि आज्ञारूपाणि सन्ति। कः परिपालयति? वेदाध्ययनं येन न कृतमस्ति सोऽपि जानाति इमानि वचनानि किन्तु प्रयोगे व्यवहारे शून्यत्वं

कारणम् ? संस्काराणामभावः। उपदेशमदत्वापि इमानि वचनानि पूर्वं जनाः जीवन्ति स्म। कारणम्? विधिपूर्वकं संस्काराणां परिपालनम्। इदानिंतने काले सर्वाः महिलाः एतस्मिन् एकस्मिन् विषये जागृताः भविष्यन्ति चेत् विंशतिवर्षेभ्योऽनन्तरं सुराष्ट्रनिर्माणं स्वतः भविष्यति। ब्रह्माण्डे अवकाशे द्युलोके नैकाः शुभचेतनाः उत्तमगर्भप्रतिक्षायां भ्रमन्ति किन्तु उत्तमायां भूम्यां यथा बीजमङ्कुरितं भवति तद्वन्मदालसासदृश्यां भूम्यामुत्तमा चेतना गगनमण्डलादवतरति। अपराधरहीतां भूमिं कर्तुमयमेकमेवोपायोऽस्ति संस्कारविषये संशोधनम्। अनेन संशोधनेन अनाथाश्रमाः भविष्यन्ति वा न भविष्यन्तीति न जाने किन्तु वृद्धाश्रमाः न भविष्यन्ति।

- **भविष्यस्य सम्भावना।**

संस्कृतवाङ्गमये नैके विषयास्सन्ति। ये भारतस्य प्राणभूताः सन्ति किन्तु ऋषिभिः उक्तम्- "पात्रतामनवलोक्य इमे विषयाः न केभ्योऽपि प्रदेयाः"। यथा सिंहिकायाः दुग्धं सुवर्णपात्रैव तिष्ठति तद्वद्वैदिकसिंहिकायाः दुग्धं ऋषीणां मुनीनां पात्रैव तिष्ठति। मोहाद्विषयस्यास्य प्रदानमविधेयम्। यो मोहाद्दास्यति स पापीयान् भवति इत अथर्वणः वाक्यम्। सोमेश्वरस्य कृपया यथा मया विषयोऽयं चितः तद्वत् भारतस्यप्राणभूतेषु विषयेषु अन्यं कं विषयमादाय भविष्येऽपि संशोधनं भविष्यति। यदि संशोधनं समाजाभिमुखं नास्ति सामाजिकसमस्यानां निवारणाय नास्ति चेत् तत् संशोधनं संशोधनं नास्ति। संस्कारे यथा इदं गम्भीरं चिन्तनमस्ति तद्वदाहारविहारसंगतौ भक्ष्याभक्ष्यभोजनविचारेष्वपि शास्त्रोक्तचिन्तनावसरास्सन्ति। शास्त्रोक्तानादर्शान् मानवजीवनशैलीं वर्णयितुमपि विषयोऽयं सहायको भविता। इत्थं संशोधनेनानेन वैश्विककल्याणाय अन्ये के विषयास्सन्ति तस्यापि बोधो भविष्यति।

- **संशोधनस्यावधिः उपसंहारश्च।**

विश्वविद्यालयस्य नियमानुसारं न्यूनातिन्यूनो योऽवधिः स च मयात्र रक्षणीयोऽस्ति। भारतदेशस्य ज्ञानवैभवः संस्कारेषु निहितोऽस्ति तत् संपादयितुं प्रतिपादयितुं प्रदातुं समर्पयितुं निवेदयितुं प्रेरयितुं च समुत्सुकोऽहम्।

सर्वेषां संस्कारान्वितविषयुतानां ग्रन्थानामालोडनपूर्वकं यथाशीघ्रं तपश्चर्यापूर्वकं भगवत्कृपाप्रसादेन विषयोऽयमुपसंहरणीयोऽस्ति। “आनो भद्राः क्रतवो यन्तु विश्वतः” इति श्रुतिवचनं उररीकृत्य प्रकृतिः पुरुषः सद्गुरुः परमात्मा मार्गदर्शकः तथा च मे प्रेयांशाः विषयसन्दर्भे उत्तमं दर्शनं मार्गदर्शनं च दद्युरिति कामये॥

॥ इति शम् ॥